*AH-I/Sanskrit-102C-2/19*

# B.A. Semester I (Honours) Examination, 2018-19

## SANSKRIT

**Course ID : 10912** **Course Code : AHSNS-102C-2**

Course Title: Classical Sanskrit Literature (Prose)

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु Group-A इत्यत: *द्वयो:* प्रश्नयो:, Group-B इत्यत: *द्वयो:* प्रश्नयो:, Group-C इत्यतश्च– *एकस्य* प्रश्नस्य उत्तरं प्रदेयम्। तेषु यथेच्छं *द्वयो:* प्रश्नयो: उत्तरमवश्यमेव संस्कृतभाषया देवनागरलिप्या च लेख्यम्:।

Group-A
(दशकुमारचरिते) 2×2=4

(i) मार्कण्डेय: केन कारणेन सुरतमञ्जरीं शप्तवान्?

(ii) ''पक्वमिदानीं त्वत्पादपद्मपरिचर्याफलम्''– केन कस्मै केन प्रसङ्गेन उक्तमिदम्?

(iii) क: आसीत् सिंहवर्मा? किमासीत् तस्य दुहितु: नाम?

Group-B
(कादम्बर्या: कथामुखे) 2×2=4

(i) 'कादम्वरी' इति कथाकाव्यस्य कथामुखे कस्य माहात्म्यं वर्णितम्? स: क आसीत्?

(ii) 'पाकशासन इवापर:'– अत्र क: पाकशासन:? तस्य हस्तकमले किं वा लक्षणमासीत्?

(iii) किं नामासीत् शूद्रकस्य राजधान्या:? राजधानीं परित: का च नदी विद्यते?

Group-C
(कादम्बर्या: शुकनासोपदेशे) 2×1=2

(i) कादम्बर्या सह शुकनासोपदेश इत्यस्य क: सम्बन्ध:?

(ii) कथं कं प्रति शुकनासस्य अयम् उपदेश:?

Group-A
(राजवाहनचरिते)

**2.** अधोनिर्दिष्टेषु किमपि सन्दर्भ*द्वयं* संस्कृतभाषया देवनागरलिप्या च व्याख्येयम्। 5×2=10

(a) अद्यैव क्षपावसाने विवाहनीया राजदुहिता।

(b) पापे भजस्व लोहजातिमजातचैतन्या सती इति।

(c) देव! दीयतामनुग्रहार्द्रचित्तम्। अहमस्मि सोमरश्मिसम्भवा सुरतमञ्जरी नाम सुरसुन्दरी।

## Group-B

(कादम्बर्या कथामुखे)

**3.** अधोलिखितयोः सन्दर्भयोः *एकस्य* व्याख्या संस्कृतभाषया देवनागरलिप्या च क्रियताम्। 5×1=5

(a) अतिचिरकाललग्नमनिक्रान्तकुतृपतिसहस्रसम्पर्ककलङ्कमिव क्षालयन्तो यस्य विमले कृपणधाराजले चिरमुवास राजलक्ष्मीः।

(b) यस्य च हृदयस्थितानपि पतीन् दिधक्षुरिव प्रतापानलो वियोगिनीमपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल।

## Group-C

(कादम्बर्याः शुकनासोपदेशे)

**4.** अधोलिखितयोः सन्दर्भयोः *एकस्य* व्याख्या संस्कृतभाषया देवनागरलिप्या च क्रियताम्। 5×1=5

(a) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषप्रकृतिः।

(b) मनसा देवताध्यरोपणप्रतारणासम्भूतसम्भावनोपहताश्चान्तःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं सललाटमाशङ्कते।

**5.** अधोनिर्दिष्टेषु *एकस्य* प्रश्नस्य उत्तरं लेख्यम्। 10×1=10

(a) क आसीत् चण्डवर्मा? तस्य दुराचारः उपवर्ण्यताम्। तस्य कीदृशी अन्तिमा परिणतिः आसीत्?

(b) कादम्बर्याः कथामुखस्य सारांशः लेख्यः।

(c) स्वपाठ्यांशमवलम्ब्य दण्डिनः रचनारीतिः संक्षेपेणालोच्यताम्।

---